
# संस्कृतोत्सवस्य
# समापनसमारोहः

१२/०८/२०२५



केन्द्रीयसंस्कृतविश्वविद्यालयेन समायोजितस्य संस्कृतसप्ताहस्य समापनसमारोहः अद्य विशिष्टाभिः सपर्याभिः सफलतामवाप्नोत्। भारतीयज्ञानपरम्परायाः प्रसारकाणां विशिष्य CBI निर्देशकरूपेण कार्यं कृतवतां भारतीयप्राशासनिकसेवापदात् निवृत्तानां विज्ञानिनां गुरुकुलयोः कविपुङ्गवानां च यथायोग्यं राङ्कव-सम्मानधनराशिफलकादिभिः सम्माननं सुसम्पादितम्।

निवृत्ताधिकारिणः कान्ताप्रसादवर्यस्य Algebra of bhaskaracharya इत्येतस्य ग्रन्थस्य पुनश्च मनोहरलाल आर्यवर्याणां हिमाचलसंस्कृतिदर्पणम् इत्यस्य काव्यग्रन्थस्य लोकार्पणं कुलगुरुप्रमुखैः सम्पादितम्।



आर् एन् अय्यङ्गारवर्यः

सारस्वतव्रतीसम्माननेन सम्मानितः सुप्रसिद्धनिवृत्तविज्ञानी आर् एन् अय्यङ्गारवर्यः (महासलिलग्रन्थकर्ता) अतीव सन्तुष्टः सन् संस्कृतेन लीलया एव धन्यवादान् प्रकटय्य विश्वविद्यालयस्य कुलगुरोश्च कीर्तिं प्रीतिं सप्रमाणमुदाहरत्। वृद्धगर्गसंहितामधिकृत्य परिश्रमेण कृतं शोधकार्यमधिकृत्यापि सानन्दमवदत्। तदग्रे संस्कृतसंवर्धनप्रतिष्ठानपक्षतः प्रकाशितानां ग्रन्थानां केन्द्रीययोजनान्तर्गतस्य कोषस्य च लोकार्पणं कुलगुरुप्रमुखैः कृतम्। तन्निदेशकः आचार्यचाँदकिरणसलूजावर्यः सारस्वतसम्माननं स्वीकृत्य पुस्तकानि प्रतिष्ठानप्रकाशनकार्याणि चाधिकृत्य अवदत्।



तदग्रे NCERT निर्देशकः दिनेशप्रसादसकलानीवर्यः सर्वेभ्यः संस्कृतोत्सवस्य शुभाशयान् संस्कृतेन व्याहृत्य वाग्देव्याः वैज्ञानिकमुखं सोदाहरणमुदघाटयत्। महोदयः अवदत् यत् प्रकृतिप्रियाः तपस्विनः प्रकृतिपूरकप्रयोगपुरस्सरम् अभिनवसिद्धान्तान् आविष्चक्रुः।



संस्कृतज्ञाः मधुरभाषिणः। अमीषां मनोवैज्ञानिकम् अध्ययनं करणीयम्। संस्कृतज्ञैः समाजोद्धारः शक्यते। संस्कृताध्ययनेन अपराधप्रवृत्तयः असामञ्जस्यभावाश्च न्यूनीभवन्ति। संस्कृताश्रितसंस्कृतेः प्रसारः सामयिके युगे आधिक्येन कर्तव्यः। राष्ट्रियशिक्षानीतेः प्रभावेण न केवलं संस्कृतपाठ्यक्रमेषु अपि तु इतरेषु सर्वेषु विषयेषु संस्कृताश्रितसंस्कृतेः भारतीयतायाश्च छायाम् अवलोकयितुं शक्नुमः।

सर्वेषु मम एकं निवेदनम् अस्ति यत् भारतीयानां छात्राणां हितमेव मनसिकृत्य पाठ्यक्रमरचना करणीया न तु स्वशास्त्रविषयाणां वैभववर्णनाय उत महिममण्डनाय वा। समावेशात्मकः पाठ्यक्रमः अवश्यमेव सर्वैः पुरस्कर्तव्यः। किञ्च समकालिकं प्रासङ्गिकं च संस्कृतम् अद्य अपेक्ष्यते। मन्त्रतन्त्रयन्त्रग्रन्थान् आश्रित्य वनस्पतिविषयकं संशोधनं मया पुरा विहितमासीत्। परम् अधुना संस्कृतसम्पर्कतन्तोः विच्छेदः यथा न स्यात् तथा संस्कृतज्ञैः समाजे कार्यं करणीयम् इत्यपि।

## शास्त्ररक्षा छात्ररक्षा च



सर्वान्ते अध्यक्षभाषणं विदधानाः कुलगुरवः अद्यतनीं ज्ञानविज्ञान-प्रशासनवेदसंस्कृतादिभ्यः पूर्णां वेदीं दृष्ट्वा स्वाभिप्रायं सविस्तरं प्राकटयन्। शास्त्ररक्षया सह छात्र-रक्षापि विश्वविद्यालयेन कर्तव्या। छात्राः विभिन्नेषु व्यावसायिक-क्षेत्रेषु कार्यं कर्तुं समर्थाः भवेयुः। तथाविधपाठ्यक्रमाः अस्माभिः आरचिताः। गङ्गातीरस्थे परिसरे तुङ्गातीरस्थे च परिसरे शास्त्ररक्षाकार्यमारब्धमस्ति। एवमेव केन्द्रीयसंस्कृतशिक्षासमितिमपि (Central Sanskrit Education Board) आरचय्य नानाविधानि कार्याणि सम्पादयामः। किञ्च NCERT निदेशकाः संस्कृतज्ञाश्च अद्य अत्रैव सन्ति। अमीषां सहयोगेन दृश्यश्रव्यसंस्कृतपाठ्यक्रमान् दूरदर्शनमाध्यमेन (Sanskrit channel) प्रारभामहे इति।

आचार्यमधुकेश्वरभट्टवर्येण सञ्चालिते अस्मिन् कार्यक्रमे डा. डी.दयानाथवर्येण वैदिक-मङ्गलाचरणं विहितम्। आचार्यमदनमोहनझावर्याः समेषां स्वागतं व्याहरन्। संयोजिका प्रो. लीनासक्करवालवर्या सर्वेभ्यः धन्यवादान् व्याहरत् ।







**वेदविज्ञानगुरुकुलपक्षतः**

**प्राचार्यः महाबलेश्वरवर्यः**

**गुरुकुलप्रभात-आश्रमपक्षतः**

**वाचस्पतिमिश्रवर्यः**





कुलगुरुकरकमलेषु शोधप्रबन्धं समर्पयन् आद्यः विश्वविद्यालयस्य वैदेशिकशोधच्छात्रः। ऑण्ड्रेनामकः मधुकेश्वरभट्टवर्याणां मार्गदर्शने शोधकार्यम् अकरोत्।



पाठ्यक्रमसम्बद्धताप्रमाणपत्रं स्वीकुर्वाणाः विट्टोभाचार्यप्रभृतयः

**आचार्यः गणेशतिम्मण्णपण्डितः**

संयुक्तनिदेशकः, प्रकाशनं विक्रयञ्च

पुटविन्यासः – श्रीशसमीरः के एस्